कुमार विरचितं गौरी स्तवः

कुमार विरचितं गौरीस्तवः

सा गौरी सुखराशिरेव सुकृतश्रेणीसुधासागरः
सौंदर्यद्रववाहिनी च सततं सा वाहिनी संपदां |
आपद्राशिविनाशिनी खलु महापापाशनैः सा शनैः
एतन्मे शयनं समेत्य शमुमा मह्यं प्रदास्यत्यपि ||1||

गौरी शारदपूर्णचंद्रवदना दृष्टाऽप्यटैर्मुहुः
कष्टं दुष्टमपाकरिष्यति मुहुः स्पृष्टा मुखांभोनिधिं | (दुःखं)
सृष्ट्वा सृष्टिविचक्षणा खलु मुहुर्दृष्टिप्रवृष्टिं परां
स्रष्टुर्दृष्टिविशेष योषित तनुं कुर्याददृष्टान्वितं ||2||(पोषित)

भाग्यैर्भूरितपःप्रभावभवनैः संभावनीयान् मुहुः
भक्ताभीष्टफलप्रदाननिपुणा साऽतिप्रवीणा क्षणं |
ध्याताऽपि क्षणदा प्रतिक्षणमतिश्लक्ष्णं भवानी कदा
द्रष्टव्या नयनश्रमापहरणं कर्तव्यमत्यादरैः ||3||

धन्यानां भवनेषु सा गिरिसुता विन्यस्य पादांबुजं
स्थित्वा सा क्षणमात्रमादरयुता तद्द्वारपालांगणे |
इच्छंती कमलाविलासमसकृत् तद्द्वारपालांगणे-
प्यालस्थेन विना रमाविहरणं सा कर्तुमन्विच्छति ||4||

देवानामपि वंद्य एव सततं यत्पादुकाराधकः
तत्पादांबुरुहं स्मरंति सुकृतैः कांतैरनंतैरपि |
तन्मात्रस्मरणेन सुंदरतरे सापींदिरामंदिरे
तत्सेवानिरता कदापि विरता श्रांता न संजायते ||5||

जातश्चेज्जननीमनोज्ञजठरे गौरीपदांभोरुहं
स्मृत्वा भूपतितामुपेत्य बहुधा भुक्त्वाऽपि भोगान् बहून् |
कुर्वन् शांभवपालनं बहुधनैः कुर्वन् शिवाराधनं
काशीं प्राप्य विमुच्यते मुनिवराराध्यामसाध्यामपि ||6||

दृष्टा चेद्गिरिराजराजतनया नेत्रोत्सवो जायते
सर्वांगं पुलकांचितं च न मनः किं तत् प्रसन्नं मम |
नित्यानंदसुधाप्रसारलहरीकल्लोलमालाकुलः
कालं किं न नयामि कालकलना सा कालकालस्य मे ||7 ||इति शिवरहस्यांतर्गते कुमारविरचितं गौरीस्तवः संपूर्णः||